श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीनिवासरामानुजमहादेशिकैः (मैसूर आण्डवन्)
संस्कृतभाषायां अनुवाद्य अनुगृहीतं
श्रीमद्वेदान्ताचार्यविरचितम्

# ॥ गीतार्थसङ्ग्रहम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ गीतार्थसङ्ग्रहम् ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

दृष्टार्थैकप्रचारे भुवन इह चतुर्वेदनिष्ठं सदर्थं
गृह्णीध्वं शिष्टसेव्यं श्रुतिशिखरगुरुं ये भजन्तेऽतिभक्त्या।
तेषां पादाम्बुजानि श्रयणपद महो मे तथा योऽन्वगृह्णात्
गीतार्थं वेदचूडागुरुमणि रनघस्तत्पदाब्जे श्रयध्वम् ॥

यो वाधर्मानुभोक्तुः प्रभु रपि जगतां सारथिः पाण्डवस्य
कर्मज्ञानोदिताया भवति पदजुषा मेकलक्ष्यं च भक्तेः।
दुर्ज्ञेयाम्नायमौलिष्वधिगतपरमब्रह्मनारायणस्सः
श्रीमानेवोपयातस्स्वयमुभयविभूतीश इत्याह तस्मै ॥ 1 ॥

बान्धव्यप्रीतिमन्तोऽप्युभयविरहितस्सन्त आसन् तदा वै
कारुण्यस्नेहयोस्स्वां मिति मतिवहतोः मानसे धर्ममामे।
भीतोऽत्यन्तं प्रणम्य स्वचरण मयमाने च पार्थेऽथ तस्मै
तत्वं बोद्धुं स्मितास्यो गुरुमणि रुपयाति स्म नारायणस्सन् ॥ 2 ॥

नश्यत्येव शरीर मन्त रुषितो जीवस्तु नाहं यथा
त्याज्यस्सङ्ग उपात्तकर्मनिकरो न त्याज्य एवाशु ते।
तस्मादात्मविगोधनस्मृतिततिर्जायेत मोहं त्यजे -
त्युक्त्वा तं विजयं विचित्रचरितः श्रीशस्समाश्वासयत् ॥ 3 ॥

सारासारज्ञ एकश्चतुरमतिरिति ख्यातिपात्रार्जुनात्र
त्यक्त्वा सङ्गं समुद्यद्गुणकृतिमखिलां सत्वं आरोपय त्वम्।
सर्वाण्युक्तानि कर्माण्यपि मयि विनिवेश्यानि चेत्युब्रुवन् ये
सर्वत्र ज्ञानिनस्तेऽप्यतिशययशस श्चेति नाथो जगाद॥ **4** ॥

मायावी वेदजीवी वितरितु मपुनर्जन्मभावं मुकुन्दः
स्वाविर्भावानुभावान् स्वय मिह निखिलावर्ज्यकर्माणि चैव।
शुद्धज्ञानात्तशुद्धीन्यपि हतिरहितात्मस्थितिं लोकनिष्ठां
एवं प्रावेदयन्मे सुविशद मधुनाचार्यसम्प्रेक्षिताय॥ **5** ॥

आत्मालोके च शैध्यं सुविदितसुकरोपात्तकर्मोदितं तत्
संसक्तस्तत्प्रकारेष्वधिकमपि मनः प्रपिकास्ताः क्रियाश्च।
दुष्प्रेक्ष्यात्मावलोकीकरणपरिकरज्ञानयोगप्रकारान्
रम्याया द्वारकाया अधिपति रवदद्धासवस्यात्मजाय॥ **6** ॥

योगाभ्यासं प्रभेदांश्चतुर इह समानस्थितींश्चापि योगे
योगोपायांश्च योगादधिगतपरमार्थांश्च योगेषु तेषु।
स्वात्मोद्देशैकयोगं सकलजनहितं मुख्यतां योगनिष्ठां
वीराग्रण्ये त्ववोचद्वरमकुटभृते भोगिपर्यङ्कयोगी॥ **7** ॥

याथार्थ्यं स्वीय मात्मप्रकृतिनिरुपमाच्छादकत्वं च तां च
माया मात्मैकतार्यां समधिकचतुरात्मीयभक्तेषु तेषु।
ज्ञानी त्वात्मैव मे हीत्यसदृशमहिमोत्कर्षतां ज्ञानिनश्च
माध्वीपूर्णारुणश्रीचरण उपदिदेशात्र पार्थाय शौरिः॥ **8** ॥

ऐश्वर्यं चानलंधीकरमखिलमलंबुद्धिपूर्णं फलं तत्
दुष्प्रापं चात्मसाक्षात्कृतिमदनुभवं वीतभूयोभवं च।
सेवास्स्वांध्यो रधस्तादभिलषितसदासेवनेच्छानुरूपाः
श्रीमन्नारायणोऽस्मा अविजितविजयायाह सर्वानुकम्पी॥ **9** ॥

श्रीमानप्राकृतात्मा स्वय मतुलसमुत्कर्ष मात्मावतारे
वैलक्षण्यं त्वनूनं धृतविविधतनौ प्रीति मेतत्सुवित्सु।
भक्तिं त्यक्ताल्पकायत्रिदशपरिषदि स्वं प्रतीतं तदीयां
सर्वं चैवं नराय स्वपरहितपरः प्राह नारायणोऽस्मै ॥ **10** ॥

श्रीकारुण्येन भक्तिं निरवधि मुदयार्थं विवृध्द्यर्थमस्याः
सौशील्यं च स्वकीयं निरवधि सुगुणापारभोग्यामृताब्धिम्।
सर्वामेतां विभूतिं निरवधिविभवा मात्ममात्राधिनाथां
निस्सीमैश्वर्यशाली हरि रमरपतेर्व्याजहारात्मजाय ॥ **11** ॥

सर्वस्वं नायको नस्स्वतनु रिति लसत्तत्प्रकारं ब्रुवन् सन्
साक्षात्कर्तुं विभूतिं सपदि तदुदितां प्रार्थयामास धन्वी।
दत्वास्मै दिव्यचक्षुः कि मुचित मितरत्साधनं वास्ति भक्तेः
साक्षात्कुर्वन्ति सन्तस्त्विति च सुविशदं प्राब्रवीत् वासुदेवः ॥ **12** ॥

भक्तिस्स्वाङ्घ्रिसमर्पिताऽऽशुफलदा ह्येषा विलम्बाक्षमा
तस्यास्साधन मेव भोग्यगुणिनो ध्यानं तदज्ञानिनाम्।
कैङ्कर्याणि लघुस्स्वकर्ममतिहीनाना मुपायस्त्विति
श्रीशस्स्वीयपदप्रियप्रियतमः पार्थाय चोपादिशत् ॥ **13** ॥

देहानां च स्वरूपं श्रुतिशतविदितं जीवभेदं तथात्म -
प्रेप्सूनां ज्ञानलाभक्रम मथ च फलं स्वात्मनो ज्ञानजस्य।
मूलं देहोपलब्धेः पृथगपि करणं चात्मनोऽन्तस्स्थमार्गं
पीयूषस्यन्दिपादो हरि रवगमयत् धन्विपार्थाय सम्यक् ॥ **14** ॥

बन्धुं त्रैगुण्यमेवाखिलपुरुष मिहानूनतः सम्प्रवृत्तं
कर्तुं त्रैगुण्यमेव प्रसृतवदखिलं दुष्कृतं बन्धमूलम्।
एवं त्रैगुण्यमायोत्तरण मपि गतीनां च दानाभिरक्षे
निस्त्रैगुण्योपकारी निजगद मकुटालङ्कृतायार्जुनाय ॥ **15** ॥

तत्वेभ्यस्त्यूष्टकेभ्यस्तनुगतपुरुषेभ्योऽपि तन्मोहितेभ्यः
जिह्वाप्रोक्ताष्टवर्णैस्सहपरमपदप्रेप्सुविश्वासिपुंभ्यः।
आदर्तव्यैः परव्योंन्यपि विमलगुणै रष्टभिर्भासुरेभ्यः
व्यापी विक्रान्तलोको निजगद विजयाय स्वमन्यं विचित्रम्॥ **16**॥

ये स्वाज्ञापरिपालकास्सुकृतिनो देवा मतास्ते तथा
ये वा तद्विपरीतकर्मनिरतास्ते राक्षसा दुष्कृताः।
त्वं तावत् प्रभुशासनानुगगुणैश्वर्यः श्रुतीराश्रय
ग्राह्यं तत्त्व मदुः स्वकर्म विजयावेहीति कृष्णोऽब्रवीत्॥ **17**॥

वेदानुक्तानि कर्माण्यतिबलदितिजेभ्यो विभक्तानि तद्वत्
वेदोक्तां कर्मनिष्ठां दृढतरगुणतस्त्रीन् प्रकारांस्तदीयान्।
वेदोक्तायाश्च तस्यास्त्रिविधविभजने लक्षणं तत्प्रभावं
वेदोद्धारी मुरारिर्निजगद विशदं वासवस्यात्मजाय॥ **18**॥

सत्कर्मातिप्रियं मे तदिह यदि भवेत्सात्विकत्यागयुक्तं
सत्वानुष्ठाननिष्ठो यदपि विहितवानात्मलक्ष्यत्वतस्तत्।
सत्वानुष्ठानलभ्यं फलमपि शरणागत्यनुष्ठान मेवं
सत्वस्यैव प्रदाता ह्यतिशययशसे प्राह पार्थाय शौरिः॥ **19**॥

सङ्गोन्मूलौषधं हीत्यतिबल ममुना मायिना शौरिणोक्तां
भोग्याम्भोधेरिवेमा मतिमधुरसुधां सर्वदात्रीं च गीताम्।
भक्तेभ्यो ये प्रयच्छन्त्यथ च निशमयन्त्यादराद्वा पठन्ति
भ्राजन्ते धूतदुःखाम्बुधिगतविविधभ्रान्तयस्ते कृतार्थाः॥ **20**॥

निर्धूताखिलदोषमङ्गलगुणक्षीराब्धिपद्मासिनी -
वक्षोऽत्यद्भुतचेष्टितप्रियतमा गीता तदीयं हि तं।
निर्दोषागममौलिदेशिकवरो भक्तिप्रपत्त्यर्थिनोः
साराथं सुखबोधधारणकृते सङ्गृह्य चान्वग्रहीत्॥ **21**॥

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमद्यामुनयोगिदर्शितपथे गीतार्थसङ्ग्राहकः
ग्रन्थश्श्रीनिगमान्तदेशिककृतो वर्वर्ति यो द्राविडः।
गोपालो गुरुराडनुग्रहफलः तत्सूक्तिलोलो मुदा
व्याख्यात् कन्नडभाषया च विभुधव्याहारतोऽश्लोकयत्॥

॥ इति गीतार्थसङ्ग्रहः समाप्तः॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥